त्वजातीयत्वमेवारंभकत्वं नविजातीयानामिति स्थितिः तथापि शरीरस्य कथंपार्थिवत्वनिश्चयः इत्यं लेदादीनां परस्परत्वाविषयदीरस्य प्रत्यभिज्ञानात्

गंधस्यच यावद्द्रव्यभावित्वात् घटवत् तथाहि घटादेः पार्थिवलेदः शोष

दशायामपि गंधोनुवर्त्तते लेदादयस्तु उष्मादिवासित जलादिगंध वति

केतनिः शरीरे पित्तघटवत्पार्थिवत्वमेवधार्यते इंद्रियमाह इंद्रियमिति गंध

व्यंजकं यदिंद्रियं तत्र घ्राणं पार्थिवं रूपाद्यव्यंजकत्वे सति गंधस्य व्यंजकत्वादित्यर्थः

गंधोपलब्धात्वावच्छिन्नकारणता स्वाश्रयसंनिकृष्टः क्रियायाः करणं निष्ठां घटत्व नियमा

त्तत्र प्राप्यकारि जनकत्वे सति तदशाभावजनकत्वात् द्रव्यं च संयोगाश्र

यत्वात् पार्थिवं च गंधवत्वात् गंधवत्त्वं च रूपाद्यव्यंजकत्वे सति गंधाभि

व्यंजकत्वात् कुंकुमगंधाभिव्यंजकतैलबिंदुवदिति सर्वमाशंतामिति

तथा

व्यक्तिसामर्थ्यम

किरणा
३३

प्राणिभेदे नेंद्रियप्रकृतिवैचित्र्यं तिरस्करोति यदिंद्रियाणि ... स्ति पृथि वली

व्याः किं तत्सर्वं पृथिव्येवमिति अत आह जलाद्यनभिभूतेति ... प्ता

द्यभिभवे सति नगंधो भिव्यक्तेः त्रिभावः घ्राणमिति लोकप्रसिद्धमिति भा

वः तृतीयं पृथिवीकार्यमाह विषयास्त्विति यद्यपि शरीरमपि विषयस्त

थापि शरीरत्वेनैव तदसाधारणरूपं प्रख्यापितमिति दर्शयितुं तादेव रूपं

तस्य दर्शितं बुद्धमान्सो पुनःविषयत्वमेवासाधारणमतस्तदुच्यते ब्रणुः

कादिप्रक्रमेणेति ब्रणुकमादिर्यस्य प्रक्रमस्य सतथोक्तः तेना रभ्यो इति

ष्वादितः मृत्तिकात्वं पाषाणत्वं प्रस्तरत्वं स्थावरत्वं उद्भिज्जत्वं सा

मान्यविशेषाः मृत्तिकात्वं केषु वर्तत इत्यत आह तत्रेति मृद्विकाराः

मृत्तिकारूपा विकाराः इति के पाषाणा इत्यपेक्षायामाह उपलेति उपलाः

प्रवाणः मरगयो माणिक्यादयः वज्रं हीरकं मण्यादिग्रहणात् गैरिकादयः स्थाव
वरा इति वृक्षाः पुष्पफलवन्तः केचिद्धष्टादिविनः त्वग्रान्मूलपादीनि ओषधयः
फलपाकान्ताः यवादयः गुल्मास्तोटाः लताः कूष्माण्डी प्रमुखतयः अवतानाः केत
क्यादयः वनस्पतयो विना पुष्पं फलानि ते: अत्र पाषाणग्रहणेनैव [illegible]: हरिताला
दयः स्थावरग्रहणेनैव पत्रपुष्पादयः शरीरग्रहणेनैव तदवयवमांसास्थ्या
दयः नाडिका नाडीर धत्तादयः संग्रहीताः इन्द्रियग्रहणेनैव तदवयवाः वि
षयग्रहणेनैव घ्राणकादयः द्रव्यग्रहणेनैव कांस्यादयः ऽधाधिग्रहणेनैव त
द्विकाराः नेडलतैलादयः रसग्रहणेनैव तालादयः ननु कोपं घ्राणकादि
प्रकर्षः घ्राणका एव प्रमाणस्याभावात् त्रसरेणवत्तावान्मनस्तासिद्धाः ने
वचाक्षिकवयस्यात्वादेवमहान्तरा दृव्यस्यचाक्षिकत्वाप्रतिरूपविशेषवत्म

किरणा
३४

हत्वस्यापिकारणत्वात् अन्यथा ह्रस्वह्रस्वतरतादौ तत्प्रकर्षानुविधानानुपपत्तेः महत्वे
सति रूपवत्वात्त्रियवत्वाच्च त्रसावयवाः कार्य्याश्च अन्यथावयवगतसंख्याद्यनुप
पत्तौ महत्वानुपपत्तेः नित्यत्वे प्रकर्षकाष्ठाप्राप्त्यभावस्य महत्वविरोधात् नच
त्रसरेणवयवा अपि सावयवाः तदवयवकल्पनायां प्रमाणाभावात नहि त्रसरे
णवयवा अपि महान्तः रूपविशेषवत्तां महतां चाक्षुषत्वप्रसंगात् यद्यपि चनेम
हत्वव्याप्तेरणुपरिमाणा निरवयवत्वाच्च प्रशिथिलप्रचयवं चित्तास्तथापि बहुत्वा
न्महान्ति कार्यद्रव्याण्यारभन्ते तेन यावच्च परमाणव एव त्रसरेणवयवा इति कृत्वा
द्व्यणुकं उच्यते महतः कार्यस्य कार्यद्रव्यारंभकत्वनियमात् द्व्यणुकसिद्धिः
अन्यथा परमाणुभिरेव बहुत्वसंख्योपेतैर्महद्द्रव्यारंभे गोघटादेरपि त्रसरेणवा
रंभात् आन्तरालिकाल्पतरतमादिकार्य्यानुपलंभविरोधात् तथा चत्रसरेण

कवदनुपलब्धिरेखोपरेखादिः घटादिरपि स्यात् तथा च संस्थानभेदानुपलं
भेत्तत्तदभिव्यंग्या घटत्वादिकमपि नोपलभेत् न चारंभ्याप्यारंभेत्त इती
न्नतुपलंभोपपत्तिः न्यूनातासमादेशतानुपपत्तेः न्यूनाधिकदेशतयास
मानदेशत्वे स्वाविरोधस्त्वापि नास्ति न्यूनदेशतया हि यत्र स्वयं नास्ति तदा
धिकदेशस्य स्थितिमात्रविरोत्सीत् स्वदेशेनास्थितिं किं धार्यादेव न त्वाप्य
विरोधित्वेनस्वत्वं जह्यात् अवयवकुपरसादिवत् संयोगीत्यपि वा देशे
न्यूनाधिकदेशतया समानदेशतया विरोधः स्यात् न चोर्द्धंचनाद्याच्छिन्नेः
देशे घटादिः संयोगेन वर्त्तते कपालं हि धर्मादित्वे त्वपकर्षेण स्वल्पतरत्वमा
दिपटोपलंभ इति चेत् न प्रतिबंधकाविगमे ऽवास्थितत्संयोगाभ्यसरवद्व
ऽपपत्तेः घाघादित्वे त्वपकर्षेणत्वपाप्यधैवरीतिरनुमतव्या तथाहि

द्वितंतुकपटादिपर्यन्तं समस्तकार्यविनाशे खंडपतौ तंत्वातिरिक्तं न किंचिदुपलभ्येत
तत्त्वेषा विचारो अण्डकेष्वपि तुल्यः नैरापियादिवत्कुम्भिकार्यद्रव्यमारभ्यते घटादयो
प्यारभ्येरन् तथा चान्तरालिककार्यपरंपरानुपपत्तौ तदनुपलंभप्रसंगः अथ
नैवं त्रसरेणुरेवारभ्यन्त इति नियमः परमाणुभिरपि स एवारभ्यत इति तुल्यं हा
नव्यो वा पपत्तो विशेषो वा वक्तव्यः उच्यते यथा स्वावयवावयविप्रसंगः पर
माणुषु विश्राम्यति तथावयवसंख्यापकर्षः क्वचिद्विश्राम्येत न चात्रिसमप
कर्षकाष्ठा द्वित्वैकत्वयोः संभवात् नत्वैकैकमन्तारंभकं अवयवसंयोगानुप
पत्त्यावसमवायिकारणाभावात् अनेकसंख्याभावे चावयविनो वयवापेक्ष
याधिकपरिमाणानुपपत्तेः अवयवापेक्षयाऽवयविनो ऽधिकपरिमाण
त्वनियमात् एकस्यावयवस्य विभागानुपपत्तौ तत्कार्यस्य विनाशासंभवेति

न्यत्वप्रसंगादिति तथा चाणुत्वमपकर्षपर्यंतः अतस्तदादिरयमारंभः तत्र
द्वाभ्यां परमाणुभ्यामारब्धं कार्यं न महत् तथात्वे तस्य कारणाभावात् ते
दपि द्व्यणुकं त्र्यणुकं यदि नारभेत यदि द्वित्वसंख्यायुक्तमेवारभेत उभयथा
पि तदुत्पादनवैयर्थ्यं स्यात् तस्मात्तेन महद्द्रव्यमारभ्यमाणं बहुत्वसंख्यायो
गि नैवेति नियमः न च द्व्यणुकवत्परिमाणवो बहुत्वसंख्यामात्रस्य महत्
कार्यमारभ्यंत इति वाच्यं सजातीयमारंभस्यातीयविद्धत्वात् कारणकारण
जातीयस्य च कार्यकार्यजातीयं प्रत्य नारंभकत्वात् नहि तंतवः पटमार
भंते तत्कारणं चांशव इति तस्माद्विवादाध्यासितास्त्रसरेणवोऽनित्यावयव
द्रव्यारब्धाः सावयवद्रव्यारब्धा इति वा महत्त्वे सति कार्यत्वात् उभयथापि सिद्ध
द्व्यणुकारब्धत्रसरेणुवत् घटवच्चेति एवं तर्हि द्व्यणुकमपि वा निरवयवद्रव्या

किरणा
३६

36

रब्धं सावयवद्रव्यारब्धं वा कार्यद्रव्यत्वात् त्रसरेणुवत् घटवद्वेति स्यात् तन्न स्यादनव वली
स्थाप्राप्तिहृतत्वात् इति त्रसरेणुकासिद्धिः पर्य्यवसिता पृथिवीति
अप्येदानीमपो निरूपयति अथाभिसंबंधवाधादिति अथ द्यंताम्भसामन्य
विशेषः नेताभिसंबंधादित्यादि एवंविधारब्धेयं नासां द्रव्यत्वासिद्धयेगु
णानाहरूपरसेत्यादि अत्रप्रमाणं सूचयति एतेति एवंविधया पृथिव्यां सू
त्रेकारवचनात् रूपादयः सिद्धास्तथा अपरूपादयः सिद्धा इत्यर्थः तथाच
सूत्रं रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धा इति यथाच चाक्षुषवत्वान्नात्रसंख्यादयः
पृथिव्यां तथापां यस्यापि यथा पतनोपदेशात् पृथिव्यां गुरुत्वं तथापोपि यथा
तरकर्मवचनात्संस्कारः पृथिव्यां तथापयस्यापि एवंगुणवत्वेन द्रव्यत्वे व्यवस्थि
ते पृथिव्यादिव्यवच्छेदहेतोरपृथक्त्वस्य व्यवस्थाहेतवे गुरुविशेषानाहरूपलक्ष्म

धुर एवेत्ता एवरूप रसस्पर्शा इति साहस्पृशोग्निसंयोगेनाप्यपरावर्त्तमानमभास्वु
रंष्णलमेवरूपमस्तु नहि पार्थिवे पटस्फाटिकादौ वर्त्तमानं शुक्लमपिरूपमाग्निसंयो
गात्परावर्त्तते अपरास्त्वमपि वा तेजसि भास्वरं तस्मादनेन विशेषेण रूपस्य
व्यवस्थाहेतुः एवं च विशेषः पृथिवीरूपस्य पाकजत्वदर्शनेन तेजो रूपस्य भास्वरत्वव्या
ख्यापनेन सूचितः उक्तयुक्तेरेव जलादिरूपस्यापाकजत्वं पार्थिवा एव हि स्वच्छभा
गास्तत्र क्वाप्येव पच्यन्ते एतेन रसोपि व्याख्यातः नहि पार्थिवे क्षीरशर्करादौ
मधुरोपि मधुरं रसं पाकेन न व्यावर्त्तते १६० एवं रसः पच्यमानोपि मधुर एव
रूप तत्स्वभाव पानीयदर्पितं पेयः यः पुनर्गुडसिन्धुमदनेन वारादिरपि रसः पयसि
उपलभ्यते स दशाम्लीक वायसैव पार्थिवद्रव्योपाधिकः कथमन्यथा घनपीतमुक्ता
त्तस्यैव मधुर एव रसः एवमपां स्पर्शो पि शीत एव क्वाचिन्नु सोष्णपि तेजः स्पर्शाभिभवा

त्रोपलभ्यते तदपगमे तु नरूपलब्धेः तदभिर्विशेषैः रूपरसस्य धर्मिणस्तु व्यवस्थापका इत्युक्तं स्नेहलक्षणस्वरूपत एवेत्याह स्नेहोंभस्येवेति अत्र केचिदाहुः नजलस्नेहो धर्मिस्तैलादिवस्यास्युपलभ्यमानत्वात् तैलादिवज्जलेऽनुपलब्धेः नापि पार्थिवा विशेषगुणः सर्वपार्थिवव्यापकत्वात् तस्मात्पार्थिवविशेषेषु घृततैल वसादिस्युपलभ्यमानः सामान्यविशेषोयगोवमाहिष्यादिषु दधित्ववादिति न दसत् स्निग्धास्निग्धत्तरास्निग्धतमादिभेदत्समातिशयत्वात् नचगोमहिष्या दिषुगुणमनुत्पाश्रित्यतारतम्यमस्ति नहीयन्म्मधुरातिमधुरादिवादिषज्जेरतिशा येनगोरितिभवति तस्मादतिशयस्यगुणैकानिमित्तत्वात् सामान्यविशेषत्वाचसामान्येऽसंभवात् गुण एव स्नेहः किंच स्नि[illegible]ग्धद्व्यावयवपरंपरायामपि स्निग्धत्वादापरमाणोः स्नेहः स्यात् नचपरमाणुषु पार्थिवीत्यादेरन्यापरः जाति

रसव्यवस्थापकाभावात् क्षीरत्वादिवद्विख्यतीति चेन्न तस्यापि परमाणुष्वभावात्
पाकजरूपरसस्पर्शव्यंग्यं हि क्षीरत्वादि तथा च पाकान्तरे स्यात् तन्निवृत्तौ क्षीरत्वादे
र्निवृत्तिप्रसंगात् न च सत्यां व्यक्तौ सामान्यनिवृत्तिरिष्यते न चाविवादितसत्ता
कः संभवमात्रेण नेतस्याभिव्यंजकास्सुर्वपार्थिवपरमाणूनां क्षीरत्वापत्तौ तदुक्तं सर्व
सर्वकापस्य पृथ्वीत्ववत् क्षीरत्वापत्तेः घटादिकादौ क्षीरत्वादिवद्वि[illegible]तीति

घ =

चेन्न न तदारंभकेषु परमाणुषु तव्यवस्था हेतोः क्षीरत्ववद्गुणविशेषस्याभा
वात् भावे वा सर्वत्र तेहः न ह्यवरूपादयो व्यवस्थाहेतवः न तदविशेषास्तेषां
घृतत्वादिव्यवस्थापकत्वात् न चैकार्थसामान्यमस्ति तैलघृतवसानावी
क्षीरमांसयोनित्वात् अतएव नारिकेलस्नेहस्यापि तैलत्वं रसादिसारूप्यात्
घृतमिति व्यपदेशः तस्मान्न परमाणुषु वर्तमानः कार्यद्रव्यं गुणक्रमेण सा

किरणा
३८
3D

वयवि पर्यन्तमायातो गुणविशेषः स्नेह इति युक्तं न च घृतादिष्वेव स्नेहोप लब्धिः
लब्धिः सातिशयस्तेहस्तत्रोपलभ्यते गुरुत्वमिव सुवर्णे वक्तव्यं तर्हि सकलज
लसाधारणी स्निग्धता अन्यथा जलावसेकेन सक्तुकासिकतादीनां संग्रहो न
स्यात् सा हि स्नेहस्वलक्षणकारितः संयोगविशेषो धारणाकर्षणहेतुः न चा
सौ केवलद्रवत्वहेतुकः काचकाञ्चनादिभिः सह तु ऽवीभ्यनेयपि वालुकापांसु
ग्रहात् नापि स्नेहमात्रकारितः स्यात् घृतादिभिः संग्रहात् तस्मात्सक
लजलहेतुकः संग्रहो भवत् तत्र द्रवत्वमिव स्नेहमपि सांसिद्धिकं व्यवस्थापय
ति ननु तथापि नैमित्तिकद्रवत्वमिव नैमित्तिकः पार्थिवासाधारणो भविष्यति
पार्थिवेषु घृतादिषु उपलब्धेरिति चेत् न तदन्वयव्यतिरेकाननुविधा
नात् न हि पयसा जलेन घृतादिषु द्रव्येषु पावकसंयोगात् द्रवत्वमुत्पद्यते न

द्विसोधिसुलिलावसेकास्व निवर्त्ततेत्यनुनेह : नेकस्मात्पाकजनत्पाविघरोघट
परमाणादिसिद्धिः परमाणुआभिर्द्व्यणुकादिक्रमेण घटादिद्रव्यमारभ्यते ॥ तत्रो
पष्टंभकतया निमित्ततामापन्नाः पार्थिवावयवाः तेषामन्त्यमुक्तो समवायः
पेत स्नेहस्त्वोपलभ्यत इति स्थिते सांसिद्धिकं च द्रवत्वमिति ॥ स्नेहस्यैव तै
लवर्धिनगंधप्रकारः ॥ तैलवदीशदवपार्थिवत्वात्सि स्नेहसंयुक्तसमवायात्तत्त
दुपलब्धिः शैत्यमस्ते हवन्तेषां पार्थिवत्वमेवकथमिति चेन्न ॥ तैलस्यभोमान
ले घृतत्वात् घृतवत् ॥ क्षीरस्यापिंडभावेपि प्रत्यभिज्ञानात् घृतेवदेवेत्यादि
स्वयमूह्यं ॥ तावम सर्वत्र देवद्विविधा ॥ नित्यानित्यभेदात् ॥ तत्राद्यो पार्थिवः ॥ पृ
थिवी तत्वाद्विविधा ॥ आपोपि द्विविधाः ॥ सर्वथापि तत्कार्यत्वात्परमाणुतया ॥ यथा
पृथिवी नित्या ऽनित्या च तथा आपस्त्वपर्वः तोद्दृत्यत्रविभक्तिपरिणामेन तत्रासांका
वि

यैत्रिविधां शरीरेंद्रियविषयसंज्ञकं तदेतान्विभागं दर्शयन् व्यातं पार्थिवमभिवात्राप्यन्त्रा वली
त्पर्यन्त्रहृतीयं आपः क्वचिच्छरीरारम्भकाः द्रव्यारम्भकत्वात् पृथिवीवत् द्रव्यस्य
हि द्रव्यारम्भणयोग्यत्वात् शरीरेंद्रियविषयभावे तद्व्याप्तायदेह्ये वेकामप्यारम्भतेन
दन्यदपि यत्नेकं तदन्यदपि न दृश्यते त्वपद्यतिरेकाप्यामुपलम्भात् नत्तोयघाप्यं
शरीरेतारम्भे रवइंद्रिय विषयावापिनारम्भेतत् नचैव तस्मात्क्वचिच्छरीरमप्यारम्भ
तं इतिसिध्यते वीहिकशरीरमित्यपेक्षामाध्याया ह शरीरमयोनिजमेवेति शु
क्रशोणितयोः नियमेन पार्थिवत्वात् पार्थिवं नच पापसीयानारम्भात् तद
योनिजमेव नत्वनुपलब्धिबाधितं तदित्यत आह वरुणलोक इति श्रव
नै = हितविप्र[illegible]व्यत्वात् नोपलम्भते तत्वाभावात् श्रोपलब्धोसि विभावः ननु
स्वयमेव द्रव्यत्वादपातरारब्धेकं घटुपभोगायतनं तदित्यत आह पार्थिवेति

यथाकाठिन्यंपृथिव्याः तदारब्धमाप्यावयवयवोपष्टंभा उपभोगाक्षमपर्यंतत्वा॥
आप्यत्वात् स्वभावरूपवदपिपार्थिवावयवयवोपष्टंभात्तदप्युपभोगाक्षम॥
र्यं विजातीयानामारंभमात्रे तत्परस्परपराहुग्रहोपीत्यर्थः इंद्रियमा
ह इंद्रियाणामिति यद्रसोपलब्धिसाधनमिंद्रियन्तदाप्यं अत्रापिरसोपलब्ध्या
स्वरूपासिद्धिः अरूपत्वेचक्षुर्घ्राणाभ्यांजकत्वेनानिरसाभिव्यंजकत्वात् सक्तुरसा
भिव्यंजकजलदंतोदकवत् प्राणिभेदेनेंद्रियप्रकृतिवैचित्र्यात्तिवादरूपायाह
सर्वप्राणिनामिति आप्यावयवानभिभूतेतरेति पातापाभिभवेनउ
त्रिकत्वादिरितिभावः किंनामधेयंतदित्यत आह रसनामिति तृतीयां॥
विभमाह विषयस्त्विति आप्यत्वापिहिमकुरकयोः शिलीभावोप
पत्तिरूपवत्त्वेवदप्स्वीति तेजोलक्षणमाह तेजस्त्वाभिसंबंधि[illegible]ति या
दि

किरणा व्याख्यानं पूर्ववत् तस्य द्रव्यत्वव्यवस्थितये गुणानाह रूपस्पर्शेति अत्रप्रमाणे वली
४० सूचयति पूर्ववदेषां सिद्धिरिति तेजो रूपस्पर्शवदिति सूत्रकारवचनात् रूपस्प
40 र्शौ चाक्षुषवचनात् संख्यादयः अद्भिः सामान्यवचनात् द्रवत्वं उत्तर
कर्मवचनात्संस्कार इति पृथिवीवदेतत्सिद्धाः प्रसिद्धाः इत्यर्थः तेजस्त्व
न वस्त्वापकात् गुणविशेषानाह शुक्लं भास्वरं च रूपमिति वस्वर्थः पृ
थिव्यादिरूपाद्व्यावर्तयति भास्वरत्वं सामान्यविशेषो वा स च रूपांतरप्रकाश
कत्वेन व्यज्यते तद्रूपं तेजस एवं तेन भास्वररूपं तेज इति लक्षणार्थः शुक्लमि
ति स्वरूपकथनं पच्यमाने घृतरूपं शातिधिक्यं नक्तं लोहितो ग्रपुलं भः त
थि इते पंक्त्या रकादिषु हासि शुक्लस्यैवोपलंभादिति प्रतिपादितार्थः नचैतद्या
प्यादिषु न तथा तोयरूपसंक्रान्त्या धावल्यप्रतीतिवाच्य अपारूपेण विजाती

यानभिभवात् नहिव्रलश्लाविना नीलादयः श्वेतेतर इति उष्ण एवस्पर्श इत्येव
कारः चंद्रचामीकरचकोरादिष्वनुपलंभहेतुकाविप्रतिपत्तिमपनेतुं तेषां ते
जस्त्वेनोष्णत्वानुमानात् तेष्वनुद्भूतत्वेनानुपलंभो न त्वभावात् तदपि द्वि
विधमिति एवं वत्तात्पर्य्यं कार्यभेदमाह शरीरादित्रयमिति शरीरमा
दित्यसततेप्या ननु पार्थिववत् तैजसं शरीरमुपलभ्यत इत्यत आह
शरीरमिति तोयवत्तैजसमपि शरीरारंभकत्वसाधनीयं ज्वलदनलकल्पे
न कल्केन भोग इत्यत आह पार्थिवेति इंद्रियमाह इंद्रियमिति [illegible]
व्यंजकत्वे सति रूपव्यंजकं न तैजसमिंद्रियं सर्वप्राणिनामिति प्राणि
भेदेनेंद्रियप्रतिवैचित्र्यशंका निराकरोति तस्सश्रावे रूपोपलब्धिः प्रमा
णं तैजसं चक्षुःस्पर्शाद्यव्यंजकत्वे सति रूपाभिव्यंजकत्वात् प्रदीपवत्

ह

अत्र केचिदाहुः अप्राप्यकारि चक्षुः अधिष्ठानासंबद्धार्थग्राहित्वात् यत्पुनः प्राप्यकारि न
तदधिष्ठानासंबद्धार्थग्राहि यथा रसनादिः इत्युत्तरस्याहरणं यदि च प्राप्यकारि च
क्षुः स्यात् स्वतोऽधिकपरिमाणं न गृह्णीयात् न खलु नखरंजनिका परशुच्छेद्यं छि
नत्ति शाखाचंद्रमसोस्तुल्यकालग्रहणं च यदि हि गत्वा गृह्णीयात् निकट
स्य मादौ प्राप्नुयात् दवीयस्तु चिरेणेति न तुल्यकालमुपलभेत अनुभव
ति तु तमालपल्लवनयनौ शाखाशीतमयूखौ चेति काचाभ्रपटलस्फटिकाद्य
न्तरितोपलब्धेश्च यदि हि प्राप्य गृह्णीयात् प्रतिघातिना स्फटिकादिद्रव्येण
विष्टंभादप्राप्तं सर्षपतृणादिकं नाददीत तस्मादप्राप्यकारि न तैजसं
मिति तदसत् अधिष्ठानासंबद्धार्थग्राहित्वस्य प्रदीपेनैकान्तिकत्वात् इ
त्युत्तरस्याहरणं स्यादिप्रस्थानगतयातद्वदेवोपपत्तेः तुल्यकालाग्रहणत्वासिद्धेश्च

तदभिमानस्यकालसन्निकर्षेणोपपन्नेः अचिंत्यो हि तेजसो लाघवातिशये तवेगाति
शयश्चतस्मा चिना च लक्षुडाचलं विन्ध्यैवमप्यरवमा लि विभवनोदरे ष्वालोक इ नयनी
मानो लौकिकानां कोचित्र समागि ष्कृतया नि स्सर देवनापेन तेजो वा ह्यालो
केनैकनां गगनं युगपदेवतावदप्यसंस्पृष्ट इंद्रियमुत्पादयति इति शास्त्रवाच्च प्रम
सोल्लोलकालयहरण मुपपद्यते इति सम्माधानमाहुः तदसत् एवं भागव्य
वहिताच्चोपलंभप्रसंगात् इंद्रियप्राप्तवे सार्जवा वस्याप्तेनप्रत्युपपद्यत इ
ति स्फटिकाद्यंतरितोपलब्धिरपि प्रसादस्वभावेन स्फटिकादीनां तेजो (वन
गतेर प्रतिनधकतया प्रदीपप्रभाव देवोपपन्नेति येषां तु अप्राप्यकारित्वं
तेषामप्राप्तत्वाविशेषाद व्यवहितेन वत्कुडयादिव्यवहितमपि किं न दृश्यते
न हि व्यवधापक प्राप्ति विधानादन्यत्र सन्तर्पकार्यविरोधि तस्मात्वेतस्मि

किरणा
४२

सत्तिनक्वचित्कार्यंभवेत्। योग्यंयोग्येनगृह्यते तत्त्वयोग्यत्वान्नगृह्यतेनतु। वली
व्यवहितत्वादित्यपि वार्त्तंस्यैर्येस्वरूपयोग्यतायास्तदानीमप्यपरावृत्तेः द्वा।
रिकत्वेपि प्रत्यासीदत्यासहकारिणामानपायत्वात् न ह्यप्रत्यासीदतः।
सहकारि प्रत्ययाः समासहकारिणापिभावान्तिरायपर्यंति प्रत्यासत्तिश्च
वौभ्रुतये निरंतरत्वादो उस्माकंच द्रव्ययोसंयोगइतिस्यात् नचक मास्या
र्थेननिरंतरोत्वादः नापिसंयोगः तत्रतदाप्य यस्यातीद्रियस्यागतिक्र
मेणनिरंतरत्वादो वासंयोगोन्यवशिष्यते नदेतदग्रे निरूपयिष्यतइति
त्वेचवादिकं कंपमेतदेवतत्त्वान्तन्य द्रष्यादीत्यतआह ग्रन्थेति ध्रव
न्येन्द्रुपलेतत्रणा समानजातीयेनापिवलवत्ताउर्वलं मभिभूपत्वे कपमत्व
यासौरेणतेजसानापनमभिभूतरुपग्रहणसमर्थ्यंभवति वदारीति

रो
वे

लोकप्रसिद्धमित्यर्थः विषयमाह विषय इति विषय इति संज्ञा यस्य तत्त्रिविधं भौमं भूमौ भवं दिव्यं दिवि भवं उदर्यं उदरे भवं आकरजं खनिराकरः तस्माज्जातं काष्ठेनोद्दिद्धिकारान्यायवर्ति वानुपलक्षयाति न देवें धन्नं दीपनं यस्य तत्तन्यो लक्षं कं तु इत्यं ज्वलनमेव स्वभावो यस्य तत्तस्या जाति निवृत्तो धर्मः स्वभाव इत्युच्यते एतद्यन्त्रमाह पचतीति पाको विक्लेदनं तस्य पादिपस्य वृत्तिर्वीस्वेदः वात श्लेष्मणोरपगमः आदिग्रहणाच्छीत डुःखापगमो दाहडुःखो त्पादश्च दिव्यमाविधनं आप एवं इंधनं दीपनं यस्य तत्तस्योक्तं किं तदित्यत आह सौरं रस्य इदं सौरं विद्युदग्निर्प्रभा आदिग्रहणाच्छडवानल इत्येतद्दिव्यं भुक्तस्याहारस्येति आह्रियत इत्याहारः औदनादि तस्य रसादिपरिणामनिमित्तं उदर्यं भुक्त एव आहारो यस्य

पार्थिवाप्यरूपमिंधनं कार्यो रसः आदित्यहरणान्नालधनन्तद्विकारार वली
लि० पार [illegible] ति बौतिभित्तं आकरजं स्वर्णादि आदित्यहरणाद्द
जनना स्वकोस्याघश्चकं कम्पं उनरे तत्तेजसं च घपि उरह्यादयः सं
युक्तं समवाये नाश्रुप च घन्ते तथापि नैमित्तिक द्रवत्वा देवपार्थिव
त्वमस्यास्ति घ्वाति घताद्विवत् न च घृतादि द्रवत्व वदेवो त्यन्ताग्नि
संयोगादेत द्रवत्वनीयत तथाद्दर्शनात् विशेष विरोधस्य चाद्दष्ट
त्वात् तथाच वदयामः न चाली यमाण द्रवत्वेन सन्मति प
दव ग्रसाधारणत्वात् किंच पो पितैजस मि छतिस्वर्णनितेनाप्यत्र
पार्थिवोभाग ३ पष्टभक एवं सव्यः न च सो नन द्रवत्व देशना याम दृ
वाप्ति तथा त्वा दी यमाण द्रवत्वं तत्राप्य त्तीति विपदेक देशव्याप्तित्वा

धिकत्वो हेतुः तस्मात्पार्थिवानीयमेतत्कस्तिभिः उच्यते रूपवत्तया तावदेतत्त्रितयं तस्मिन्
मितिस्थितं तत्र सांसिद्धिकद्रवत्वशेषत्वयोरभावात्स्नेहाविनाभूतद्रव्यान्तरसंग्रहात्तप
पत्ते घृतजलं न च तैमित्तिकद्रवत्ववत्त्वात्पार्थिवं विपक्षे बाधकाभावात् नो हि र
निमित्तात् द्रव्यान्तरे द्रवत्वोत्पत्तिः किं चेद्धिरुण्यद्रि न चोर्ध्वज्वलनतिर्यक्पव
नवदुष्णाति नियतमेकदेशवृत्तित्वात् न च मधुच्छिष्टवनियतत्सर्पिरादीनाम्
भिन्नजातीयत्वात् तस्मात्तत्तद्भेण हेतुर्नियत इत्थम् इहकार्याग्निसंयोग
निबंधनं द्रवत्वमुत्पद्यमानं कर्मवत्पार्थिवत्वाद्दिव्यवहेतुः किंतु पार्थि
वं रूपमग्निसंयोगादसान्निविरोधान्तरे परावर्त्तते साति ततो नियमः इदमेषा र
नेन घटादिषु दृष्टान्तेन जलसंबंधमतुतेनैषोवादर्शनेन कार्यकार्यका
रणाभावव्यवास्थितेः नादिदंस्फुवर्णादिकानिरंतरं ध्मायमानमपि न हवं

रूपंजहातिनचरूपांतरमापद्यतेतेनजलवदपार्थिवमनधमर्यते नैनैवचद्रव्यांतरे वली
रेणप्रतिबद्धत्वादुपष्टंभकोपिपार्थिवोभागः सदृशरूपएवानुवर्त्तते यत्तुपुटपाका
दिनारक्तसारतादृश्यतेनाग्निसंबंधेभ्रंशाभिभावकनेद्रव्योपगमादितियुक्तमुत्प
श्यामः तदयंप्रयोगः सुवर्णादिनसारता दृश्यतापार्थिवंसत्यांतौग्निसं
योगेप्यपरावर्त्तमानरूपत्वाज्जलवत् तैजसंचैतन्नपार्थिवाप्याभ्यामन्यत्वे
सतिरूपवत्वात् सूर्यालोकवत् एतेनपारदादिव्याख्यातं आप्यादन्यत्व
स्यद्रव्यांतरसंग्रहाभावादेवसिद्धेः सांसिद्धिकद्रवत्वस्याग्निसंयोगादेवजायमा
नत्वेनबाधितत्वात् आविर्भावितेजोवद्धर्म्योपपत्तेः तैजसत्वेचागमस्वा
दादिति नत्वभावेस्वरूपत्वात्तेनत्तेजइतित्यापिस्यात् नस्यात् असिद्धेः नहिमं
ध्याह्नेप्रदीपोबहिर्भास्वरोनोपलभ्यतेइत्यभास्वरः उपष्टंभकद्रव्यरूपाभिभवेने
वानुपलंभोपपत्तेः अप्यनयनरश्मिवदनुद्भवेनैवानुपलंभः किंनस्यात् नस्यात्

नचक्षुरादिद्रव्यस्याप्यनुपलंभप्रसंगात् न ह्यनुद्भूतरूपं द्रव्यं उपलभ्यते अन्यथा
ग्रीष्मोष्मणोपि निर्दर्शनप्रसंगात् अभिभवेपि मध्यंदिने प्रकाशानुपलंभवद
नुपलंभस्तत्कल्प इति चेत् नहि रूपस्याप्यभिभवे द्रव्यं नोपलभ्यते महारजनरूपाभिभू
ते धवलिम्नि पटानुपलंभप्रसंगात् तस्मादभिभवत्वाद्रूपमेव तस्य न दृश्यते सत्र
मायसोशीतिविरुद्धमपशीगुटिकानलमहाप्रकाशेमाहारजतनेदृश्यत इतिसं
क्षिप्रवदातं कथंतर्हि स्ववर्णादौ रसाद्युपलब्धिरित्यत आह नत्वेति प्रतिनियते
न्द्रियग्राह्यगुणाश्रयतया पृथिव्यादीनां प्रसिद्धत्वात् गंधादिक्रमस्य क्रमेणैव
व्याख्यानात् तेजोनंतरं वायुलक्षणमाह वायुत्वाभिसंबंधवान् वायुरिति लक्ष
णार्थः पूर्ववत् तस्य द्रव्यत्वसिद्ध्यर्थं गुणानाह स्पर्शेति एवं गुणवत्तया द्रव्यत्वे
सिद्धे वायुत्वव्यवस्थाहेतुं विशेषमाह स्पर्शोस्येति अस्य वायोः अनुष्णस्पर्श इति अने

किरणा
४५

45

न तेजसो व्यावृत्तिरस्थित इत्यत आह अपाकज इति पार्थिवाः तत्रानुष्णाशीत वली
त्वमस्य अन्यतासिद्धं अपाकजत्वं अपार्थिवस्पर्शत्वात् तोयस्पर्शवत् पा
कजत्वं हि विशेषान्तरव्याप्तमनुपलब्धं अन्यथा सर्वगुणानां पाकजत्वप्रस
ङ्गप्रसंगात् तदितो व्यावर्तमानं स्वव्याप्यमनुपादापत्तदविरहिणि पार्थिव
विशेषाप्यतीति प्रतिबंधसिद्धिः सोऽस्तिवायावित्यत्र प्रमाणास्त्वचपत्तिगुरु
ण वितिवेशेति तथा च सूत्रं वायुस्पर्शवानिति संख्यादिकं स्वकारसंमति
मोहमत्रापि ख्यातिरूपरहितेष्वपि तमान्तानामेषामच्चाक्षुषत्ववदतस्स्वका
रेण रूपरहिते वायौ सद्भावः प्रमाणेन संख्यापरिमाणपृथक्त्वसंयोगवि
भागवत्ता या ईद्व्यारंभकत्वं संख्यापरिमाणपृथक्त्वसंयोगविभागं द्रव्या
रंभानुपपत्तेः विभागेन विना संयोगाविनाशानुपपत्तावारंभसविनाशा

नुपपत्तेः परत्वापरत्वाभ्यां विनासंयुक्तसंयोगाल्पीयस्त्वमहत्त्वासंभवेन
त्त्वानुपपत्तेरिति संस्कारेसूत्रकारसंमतिमाह त्वग्योगाति त्वग्यकर्मवायुः
संयोगादितिवचनादित्यर्थः तथाच प्रयोगः एतद्रूपवद्द्रव्याभिघात
मंतरेण त्वगकर्मस्पर्शवद्वेगवद्द्रव्याभिघातजंविशिष्टकर्मत्वात् नदीपू
राहतकाष्ठादिचलनकर्मवदिति तदेतत्कंपलिंगइत्यत्रस्फुटीभविष्यति
एतेनारूपस्पर्शवान्वायुरितिलक्षणमप्यूहनीयं तथाच सत्यनुष्णाशी
तापाकजस्पर्शवान्वायुरितिसिध्यति सोऽपंचधानित्यएवक्वावयवानवस्था
स्यात् कस्यचिन्नाशोऽनाश्रयंचकार्यमापद्येत अथानित्यस्त्वनिःप्रामा
णिकत्वात् प्रमाणस्य पर्शस्यातीन्द्रियत्वात् स्थूलानां शब्दध्वतिकंपानां
परमसूक्ष्मद्रव्याभिघातानां चाहेतुत्वादित्यत आह सचायमिति द्विविधोऽनि

स्यानित्यस्य यथा संख्यम् कार्यभेदादिवचनात् तत्र तयोरेककार्ययोर्मध्ये र
कार्यलक्षणस्य त्रिविधः ततस्त्रो विधामाह शरीरमिति तेजसमध्ये शरीर
मयोनिजमेव ननु पार्थिववयोनिजमपि वायोर्द्व्यारंभकत्वेन तेजोवयवे
रारंभकत्वेऽस्यपि नैक्त तदिष्यपेक्षायामाह मरुलोक इति ननु तस्य ताल्वाद्य
भावेवाग्व्यापाराभावात् करचरणाद्यभावे चाहारविहाराभावात्
स्थाने विशेषाभावे चेंद्रियाश्रयत्वानुपपत्तेः कथं भोगायतनमित्यपेक्षा
यामाह पार्थिवेति उपलक्षणं चैतत् भूतांतरस्यापि संभवात् इंद्रिय
मिति रूपादिषु मध्ये स्पर्शोपलंभकं यदिंद्रियं तद्वायवीयं सर्वप्राणिनामि
ति सर्वविदत्रापि स्पर्शोपलब्ध्याकरणमात्रोसिद्ध संयोगाश्रयतया द्रव्य
त्वे सिद्धे रूपादिषु स्पर्शस्यैवाभिव्यंजकत्वात् वायवीयत्वं अंगसंगिसलिज

वली

श्रोत्रमात्राभिव्यंजकत्वं ज्ञात्वा तद्वदित्यर्थः तृतीयं कस्यचिदेव वायोरिंद्रियत्वं न
सर्वस्येति नियमहेतुमाह स्पर्शवत्वादीति अत्र त्वक्कुहरोपनिहतायां त्वचि
तस्य स्पर्शोपलंभ इत्यनुसंधिः तत्स्थानविशेषमाह शरीरव्यापीति सर्व सर्वं स्थ॰ पं॰ ३
शरीरव्यापि स्पर्शोपलंभादित्यर्थः अत्र व तदवस्थानं च शरीरं नखलोमा
दयस्थानानां संयोगि द्रव्यमात्रत्वम् त्वगिंद्रियानाश्रयत्वादित्यभिप्रायः लौ
६ केप्रसिद्धत्वं तत्संज्ञामाह त्वगिति ननु वद्धिर्वेदेहजावरणमात्रं त्वगित्युच्यते तत्प
तत्र च पार्थिवं प्रत्यक्षसिद्धं चाति तच्चेंद्रियं न च वायवीयमित्यत आह
इंद्रियमिति न त्वगेव चक्षुरेव तो वायवीयमिंद्रियं त्वगित्युच्यते किं तल
क्षणेन तस्यापीन्द्रियं त्वगिति व्यवह्रियते लौकिकैरित्यर्थः विषयास्त्विति
तत्र शब्देन उपलभ्यमानात् स्पर्शाद्व्यावर्त्तयति उपलभ्यमानस्य

किरणा
४७
48

र्शस्याधिष्ठानभूतो न तदुपलभ्यत इत्यर्थः नन्वनुपपन्नमेतत् स्पर्शनिग्रहण वली
मत्वाद्वायोः त्वगिंद्रियव्यापारानंतरं वायुर्वातीति प्रतीतेः नचस्पर्शमा
त्रमेव तत्र प्रतीयते वायुस्त्वनुमीयत इति युक्तं शीतो वायु रूक्षो वायुरिति
तदीयस्पर्शाभिभवेपि वायुप्रत्ययात् नचशीतोष्णद्रव्योपपन्नाधकत्वेना
नुमितस्य पवनस्य तथा प्रतीतिरिति युक्तं बाधकाभावात् श्रोत्रिस्वरूप
त्वादचाक्षुषत्वं वा धर्मं द्रव्यस्य हि स्पर्शनत्वं हि चाक्षुषत्वेन व्याप्तं वा दृष्टो
क्वा वर्त्तमानं चाक्षुषत्वं स्पर्शनत्वमपि व्यावर्त्तयतीति चेत् न विपक्षे बाध
भावात् न हि चक्षुरूपाभ्यां त्वचस्पर्शस्य वा किंचिदुपकर्त्तव्यं त्येनाभिपे
क्षास्यात् नेष्यात्तेवाजात्यं घेत घटादयोपि त्वचा नोपलभ्येरन् रूपा
भावेन द्रव्यवत् स्पर्शोपि नोपलभ्येत उष्णं जलं शीतलं शिलातलमित्येवं

स्पर्शी तु स्पर्शाधिष्ठानयोस्तेजःपाथसोरप्युद्भूतरूपानुपलंभेपि स्पर्शस्योपलब्धेः
द्रव्यस्य तु चाक्षुषानुपलभ्यमानस्य स्पर्शेनानुक्वचिदप्यनुपलम्भात् नैवमि
तिचेन्न अपार्थिवे सर्वत्र तर्हि त्वचा स्पर्शमात्रोपलब्धिरस्तु द्रव्योपल
ब्धिस्तु च चाक्षुषवत् क्वचिदनुमानेनाणुवद्भविष्यति प्रत्यभिज्ञानमपि तद्वदेवो
पपत्स्यते अप्रत्यक्षत्वेऽबाधात् स्यात् प्रमाणचिन्तायामनुपलभ्यमानः स्प
र्शश्चाश्रयसहित एवोपलभ्यते अनुद्भवस्य तु रूपद्रव्यत्वात् अत एव तेजसि
त्वचैवोपलंभ इष्यते गुणायोग्यतामित्यत्वच्च चाक्षुषोऽव्यावर्तनात्
दितियदि वायावपिसमानमेतत् तथाच प्रयोगः विवादाध्यासितो
वायुः प्रत्यक्षः उपलभ्यमानस्पर्शाधिष्ठानत्वात् घटवदिति अत्रोच्यते
द्रव्यग्रहणयोग्यतां न रूपितयोग्यतां कानि खलु संख्यापरिमाणपृथक्त्व

किरणा
४८

संयोगविभागपरत्वापरत्ववेगकर्माणि एवं घ्राणादीन्द्रियग्राह्यतानिर्वाह
तिर्यादित्वचावायुरूप लभ्येत संख्यादयो प्युपलभ्येरन् नचेत् द्रव्यमपितोर
पलभ्येत न द्रव्योपलंभयोग्यत्वात् न चत्वचावायोरकत्वात् संख्यावाह
स्तवितस्यादि परिमाणे वा पृथिव्यादिष्वः सजातीयत्तो वृष्टयत्न संयोगवि
भागौ परत्वापरत्वे वा कर्मवोपभज्यन्ते ननूद्भूतत्वे पलंभयोग्यत्वे वासिद्धा
द्रव्यात्संख्याद्यनुपलंभेपि शालतालतमालादीनामुपलंभादितिचेत् न द्रव्य
दिदोषेण संख्यादयोनोपलभ्यंतां तत्त्वादिपोदयताया भ्रांतिवृत्तेः दोष
निवृत्तावुपलभ्यात् तस्माद्रव्योपलंभसहचरोपलंभ योग्यानां संख्यादीनां
सर्वथानुपलंभादवायुघ्राणोनस्पार्शनःपवनइति नद्वेतत्तस्याप्रत्यक्ष
त्वापितानात्वं संप्रहर्षेनेनानुमीयत इह च स्फटिकमणिविष्याति प्रतएवा

दि=

नुपलभ्यमानसंख्यादिकेतोप तेजसीत्वचानोपलभ्येत इति विवृतिभ्रवः
न्तव्या चोपलभ्यमानस्पर्शाधिकानत्वमप्यनैकान्तिकमिति सिद्धं कुतस्तर्हि
प्रत्येतव्यमित्यत आह स्पर्शेति स्पर्शः शब्दो धृतिः कं पञ्च लिंगानि यस्य [illegible] पोक्त सत्त=
पोपरूपि द्रव्यासमवेतः स्पर्शः क्वचिदाश्रितः स्पर्शत्वात् पृथिवीस्पर्शवदिति न
चायं जलानलयोः अनुष्णाशीतत्वात् न च पार्थिवः रूपेणासमानाधिकरणत्वा
त् यत्तु पार्थिवानां सर्वेषामेव घटादिस्पर्शः न च रूपेणासमानाधिकरणत्वा
त्मासिद्धं योग्यानुपलब्धेः रूपं चायोग्यरूपमिह भावेऽभ्युपेतमिति चेत् आभि
भावकस्य रूपान्तरस्य नानुपलब्ध्योरभिभावानुपपत्तेः पाकजत्वेन पार्थिवरूप
स्पर्शयोस्तुल्ययोगक्षेमत्वस्पर्शस्योद्भवे रूपस्यानुद्भवायोगात् अन्यथा
पार्थिवरू[illegible]पिस्पर्शानु[illegible]वप्रसंगात् किंचानुपलभ्यमानरूपस्य स्पर्शाधि
द्रे– ड

ष्ठानमस्तस्य पार्थिवीत्वे गुरुत्वमपि स्यात् न च पवनादुरितस्य वर्ण्य पुटकादेरधूर बली
एणदर्शनातो धिकमवतन तमनुमीयमानस्य धूमादुरितत्वेनेदमनैकांतिकमिति
चेन्न न अत्र लंधमदर्शनात तत्रापि गारिमविशेषहेतोर वनमनस्य प्राप्तत्वेन ::
तस्मा द्विवादा ध्यासितं न पृथ्वी रूपरहितत्वात् आकाशवत् गुरुत्व
रहितत्वात्तेजो वदितिरस्थितेतस्य धीप्रयेतया चतुर्थद्रव्यासिद्धत्वीति एवमस
तिस्पर्श द्रव्याभिघातैर्योयं पर्शादिशुद्धवसंतानः स्पर्शविद्रगवद्रव्योसंयोग
प्रभवः अविभज्यमानावयवद्रव्यसंबंधि शब्दसंतानत्वात् दंडाहतभरीव
वदिति एवं गुरुणो द्रव्यस्या पतनधृतिः ततो प्यनुमीयते वायुः तथा
च प्रयोगः नभसि तृणतूलतनपित्वा विमानादीनां धृतिः स्पर्शवद्वे
गद्रव्यहेतुका अस्मदाघताधिष्ठितद्रव्यधृतित्वात् नौकाधृतिवत्

कंपस्य लिंगत्वमुक्तं एषां चतुर्णां कार्यत्वादिति सारंगः प्रतिबंधः तिर्यग्गम
नं स्वभावो यस्य स तथोक्तः अत्र दृष्टवदात्मसंयोगात्तिर्वंधनमस्य तिर्यग्गम
नं तेन वकः ७ तथा पर्य इत्यत आह मेघादीति आदिग्रहणाद्देहायसानां विमा
नादीनां भौमानां च पत्रपांसुपलादीनां जलानां योग्नेपरिग्रहः धारणादि ट
त्यादिपदेन स्पर्शाभिव्यक्तिदीपन यो परिग्रहः तेषु समर्थः तस्य प्रत्यक्ष
स्याप्येति यद्यपि परमाणुरूपत्वामतीन्द्रियत्वात् स्पर्शस्य प्रत्यक्षसिद्धत्वा
त् अत्र पर्वतवदपतिव्याप्तिर्वासिद्धं अवयवविनाश न स्थूलेन द्व्यणुकादिप्रक्रमे
णारंभात् पवनजातीयस्य धर्मिग्राहकप्रमाणादेवैतत्सिद्धं शक्यते च स्पर्शो नाना
वत्तयानुमातुं न च प्रासादि शिष्टबुद्धिर्वुत्पादना यथा घोघासविकरणा
नवतानात्वानुमानु प्रपंचमाह तस्येति अथ का किमिदं सामर्थ्यं नामेत्यत

ह्रि=

किरणा
५:

तत्राह संसृष्टमिति समानजवयोस्तुल्यवेगयोर्विरुद्धदिक्क्रिययो विरुद्ध वली
यो [illegible] ष्टो क्रिययोस्तयोः सांनिपातो मेलनं संयोगविशेष इति पाठात् वायो
रिति प्रकृतत्वेन स्पर्शवतोरिति न विवक्षितं ननु वर्तीन्द्रियस्य तात्वाद्वेग
सान्निपाताद्वप्यतीन्द्रियाविप्त्यत आह सोपीति एतत्सांनिपातोपीत्यर्थः
उद्गमनेनानुमीयते ननु वर्तीन्द्रियस्योद्गमनमप्यतीन्द्रियं तत्कथं तेन
संनिपातोनुमीयते इत्यत आह अनुमितेनेति अप्रत्यक्षेणैव लिंगेनेतत्नुमी
यते इत्यत आह तृणादिगमनेनेति अत्राप्रत्यक्षेत्वनुपपंजतीयं तेनातेन
तृणादीनामूर्ध्वगमनेन कार्येण अत्यन्तासिद्धे न कारणमूर्ध्वगमनं पवनस्या
नुमेयं नचैतद्घनस्करूपस्य अपसरे एकरूपस्य वाधायो तृणां मूर्ध्वगम
नमनेनोन्नमत्स आह नेत्यत आह सावयविनोरिति अवयवानामवयवि

८

त्वेन लक्षणादिद्वेरणोपयिकं महत्वं स्वाभिप्रैति एवमीयता प्रबंधेन संख्यादीनां कर्मप
र्यंतानां बाधावती द्रियत्वमुक्त्वा तिर्यग्गमनस्वभावस्य कथमूर्ध्वगगनमित्यत्रोप
पत्तिर्दर्शिता न च वायुवायुत्वापधिकमूर्ध्वगतिशालिद्रव्यांतरं तदारंभकं नीयमि
ति स्वसंचितं तिन्नामिः स्पर्शगुणस्वभावानामप्यपां यथा द्रव्यांतरसंगृहीतानामूर्ध्व
गगनं तत्रैवपवनस्यापूर्ध्वगमनोपपत्तिरिति मैत्रैवं प्रयोगः प्रतिहन्य
मानाद्वायोः प्रतिहन्तावायुरन्यः न प्रतिहन्तृत्वात् देवदत्तापहतदत्तवत्
अभेदे तु प्रतिघातानुपपत्तिः संयोगस्य द्विष्ठत्वात् प्रतिहन्यते चायं वा
युस्तिर्यग्गमनस्वभावस्य यथा तत्रासंभवे सत्यूर्ध्वगमनवत्त्वात् परस्प
राहतनदीनीरपूरवत् अन्यथा निमित्तान्तरासंभवे कारणं विनाकार्योत्पत्ति
प्रसंगः ऊर्ध्वगतिमानयं तृणादीनामूर्ध्वगमनासमवायिकारणसंयोग

प्रयत्नात् तृणादीनामूर्द्ध्वगमनासमवायिकारणसंयोगाश्रयज्वलदनलवत्
पूर्ववत्तर्कः तृणमूर्द्ध्वगमनंस्पर्शविद्वेगवद्द्रव्यसंयोगजन्यं अनूर्द्ध्वग
मनशीलस्य प्रयत्नाद्यभावे सति ऊर्द्ध्वगमनत्वात् ज्वलत्पावकप्रेरिततृणा
मूर्द्ध्वगमनवदिति चतुर्थीविधमाह प्राणोन्तःशरीर इति शरीराभ्यन्तरचा
रिवायुः प्राण इत्युच्यते ९ त्पर्यः तत्किं संयोगभेदादेव विषयादिभ्यो भिद्य
ते ९ त्यत आह रसेति आशितपीतस्याहारस्य सारो विकारो रसः मलाः मूत्र
पुरीषस्वेददूषिकादयः धातवो रुधिरादयः प्रक्रान्ताः उपलक्षणं चैतत् दोषो
वा पित्तकफौ उदर्यश्चाग्निः तेषां प्रेरणमित्यवन्तो नयत आदिग्रहणात्प्रा
रणं विपाकाद्यतेषां हेतुः एतेन विषयादसाधारणक्रियाभेदात्भेदो ९
दर्शितः मूर्त्तयोः समानदेशत्वाविधितया शरीराः पंचवायवः इत्यागमासि

क्रिमन्वयात्समर्थ्यते एकः सन् क्रियाभेदादिति एक एव प्राणः तेषां मलादी-
नां कार्यभेदात्तां च संज्ञां लभते ननु संज्ञाभेदात्सांख्यैर्भिघट इत्यर्थः मुखनासि-
काभ्यां निःक्रमणप्रवेशनात्प्राणः तेषामेव मलादीनामधो नयनादपा-
नः आहारेषु पाकार्थं शमं नयनात्समानः ऊर्ध्वं नयनादुदानः नाडीमुखेषु वि-
ततत्वाद्व्यानः तेभ्योऽपि वायवः शरीरेन्द्रियविषयानारभमाणाः किम-
विच्छेदेन आहोस्विद्विच्छेदोऽप्यस्ति यदा विच्छेदेनारभन्ते तदापि किं मेत एवाकु-
नाथ ह्यचेतनत्वेन ते तदापि किमधिष्ठिताः किं वा केनाप्यनधिष्ठिता इति
कथ्यात्रा विशेषः आविच्छेदे तावत् वचनादात्मयस्य प्राप्तस्यामितिव्या-
कृष्येत लोकसंत[illegible]त्याविच्छेदे वेदसंप्रदायस्याप्यविच्छेदात्त्वविच्छेदे चाथ व्य-
वहारवृत्त्यनुपपत्तेः सर्वव्यवहारविरहप्रसंगः फलाभावात् एते एवेः

ति यद्येवं वैचित्र्यानुपपत्तिरेषां साधारणत्वात् अदृष्टापेक्षायां सर्ववृत्तिनिरो वली
धेकार्य्यानुपपत्तिप्रसंगः अदृष्टानां प्रत्यर्थं वृत्तिः लाभेकारणत्वाभावात् अ
नधिष्ठितानामेव प्रवृत्त्यावचेतनत्वानुपपत्तिः प्रवृत्त्यनुपपत्तिर्वा अ
चेतनप्रवृत्तेः पराधिष्ठानकार्य्यत्वनियमात् अधिष्ठातृत्वं च नास्मदा
दीनां उपादानाद्यनभिज्ञत्वात् नेश्वरस्य प्रयोजनाभावात् इति समा
कुलितान् शान्तो निवासितं समाश्वासयन्नाह चतुर्युगामिति सृष्टिसंहा
रयोः सर्गप्रलययोर्वा विधिः प्रकारः अण्डकादिप्रक्रमेण सृष्टिः क्रियाविभा
गादित्यादेव परमाण्वन्तः प्रलय इति कथ्यते सृष्टिसंहारयोरस्तीदंप्र
थमतां प्रतिपादयितुं सृष्टिक्रममनुपक्रम्य संहारप्रक्रमं प्रतिपादयति ब्राह्मे
णामानेनेति क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयं अष्टादश निमेषा

ष्ठकाष्ठाः त्रिंशत्तु ताः कलाः त्रिंशत्कलो मुहूर्त्तः स्यात्त्रिंशद्रात्र्यहनी तु ते अहो
रात्राः पंचदश पक्षो मासस्तत्ताउभौ ऋतुर्मासद्वयं प्रोक्तमयनं तु ऋतुत्रयं अ
यनद्वितयं वर्षो मानुषेयमुदाहृतः एष दैवस्त्वहोरात्रस्तत्र पक्षादिकल्प पूर्ववत्
दैववर्षसहस्राणि द्वादशैव चतुर्युगं चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते रा
त्रिश्चैतावती तस्य ताभ्यां पक्षादिकल्पना तथा च वर्षशतांते वृत्तमायुस्तस्य
ब्रह्मणोऽपवर्गकालेऽस्मोत्सकाले ये ह्यसांकल्पितफलकर्मकर्त्तारः साकारोपास
नाधारिवासितचेतसो यत्र यत्तो हिरण्यगर्भपदवीमनुप्राप्यापवृज्यंते इत्या
गमात् यदा ईश्वर एवका यविशात् गृहीतदेहो ब्रह्मा विस्थानापद्यत इति पक्षः घ
तदा ब्रह्मणोऽपवर्गकाले देहापवर्जनकाल इति बोध्यं तस्यात्यंतदुःखाभा
वत्तो नित्यमुक्तत्वात्ँ संसारे जन्ममरणप्रबंधांधकारे खिन्ना नानाविधे

दि

दुःखैस्तिरस्कृहीभूतानां निशीव निशि प्रलये विश्रामार्थं किंचित्कालं दुःखविघूर्णार्थं सक
लभुवनपतेः कालाग्निरुद्रादिपरमेश्वरपर्यन्तानां भुवनानां पत्युः स्वामिनो यथेष्टं वि
तियोन्कुरितियावत् एतएवमहेश्वराख्याश्चान्येहि ईश्वराः जगदेकदेशपतयः रुद्र
वरुणयमादयः सपुनः कृत्स्नस्यैव जगतः श्रोतोमहानीश्वरतत्त्वस्य संजिहीर्षासम
कालं संहरणेहासमनंतरकाले यद्यपिभगवान् इच्छानित्यास्तीत्येवमाकारसंस्कैव
तथाप्युपाधिभेदात्संजिहीर्षाचिकीर्षेत्यादिकच्यते उत्पत्तिरपितस्यउपाधु
प. तिरेवसच कालविशेषोवर्षशतानां दिशाद्यवाच्यः शरीरेंद्रियमहाभूतोप
निबंधकानामुत्पत्तीरिप्सितिहेतूनां परमाणुभ्योत्र चिकपरिमाणतयोपचा
रात्ब्रह्माण्डकमपिमहान्तं तम्भूत्वा सर्वात्मगता इच्छा नाससर्वस्वात्मस्तसम्भवं
तानामत्र इच्छानां सर्गहिनेतानांमितिशेषः व्याप्तिनिरोधेसतिप्रलयेहन्तताहष्टे

नप्रतिबंधेसतिमहेश्वरेच्छात्माणुसंयोगजकर्मभ्य इतिमहेश्वरेछायासाहित्यार
येआत्मपरमाणुसंयोगात्तेभ्योजातानियानिकर्माणितेभ्यः शरीरेंद्रियका
रणाणुविभागा त्तेभ्यस्तत्संयोगनिवृत्तौतेषांशरीरेंद्रियारंभकापरमाणवं
तेतिवक्तुमुचितंतस्याप्यंतरावस्यावयववयचतत्वभंगनिरासेनपरमाणु
नामवाधित्वमाविष्कर्तुमापरमाएवंत इत्युक्तं तेनैतदुक्तंभवतितावद
यंविनाशोयावत्परमाणवोसानामिति तन्तुयथादृष्टांतः पटइतितत्या
तेनैवक्रमेणमहेश्वरेछादिनापार्थिवस्यज्वलनपवनाभ्यांमहाभूतानां
मेतेनैवक्रमेणक्रियाविभागादिनोत्तरस्मिन्नुत्तरस्मिन्सतिध्वंसविनाशः
जलादौसतिपार्थिवस्यमहाभूतस्यज्वलनादौसतिजलादेरितिप्रपंचवक्र
नविशेषानिश्चयआगमानुमानव्याः परमाणवंतोविनाशइतिवचना

किरणा
५४
54

देवपरमाणवस्तावस्थाने प्रतिपादिते सांख्यादिमतनिरासाय पुनस्तदवस्थान
मानत इति तदेतदर्थः प्रतिभक्ताः कार्यद्रव्यरहिताः अवयवारम्भसंयोगरहि
ता इत्यर्थः न क्रियमेव एवावतिष्ठंते नतिउच्यते किंतर्हि धर्माधर्मयुचसंस्कार
अभावनाख्यः नैरन्तुवक्रासंवक्राश्चात्मानः उपलक्षणं चैतत् अन्यापि नित्य
वर्गः अनित्येष्वपि पाकजादूपादयो गुणाः कालावच्छेदोपाधितया यावन्तिमा
तानि च महाभूतसंतानाभवं प्रभववेगजानि कर्माणि संतत्यमानानि अवतिष्ठं
ते अन्यथा कालावच्छेदानुपपत्तौ पुनः सर्गानुपपत्तेः तदिदमुक्तं तावन्त
मेव कालमिति ब्राह्मेणमानेन वर्षशतान्तमिति यावदित्यर्थः एवं सं
हारक्रममभ्युत्पाद्य सृष्टिक्रमं प्रतिपादयन्नाह ततस्तदनन्तरं पुनरित्यस्या
समाहतेन सर्गप्रलयधारनादिनामभिव्यन्ति अथ किमर्थं पुनर्भगवान्

वली

स्वहृत्पतिश्चतत्रुखार प्राणिनांभोगभूतयइतिसाक्षात् प्राणसंबंधयोग्या
नांसंसारिणामितियावत् भोगस्यतत्समवेतसाक्षात्कारस्तुसुखदुःखानुभाव
स्यभूतयेनिष्पत्तयेईश्वरस्यसिसृक्षाया: सर्जनेच्छायाअनंतरंसर्वेषाम्
स्तसंसारिणुगता: समवेताअदृष्टवृत्तिलब्धाअलब्धवृत्तयआयेअदृष्टविशे
षात्तद्वेदोत्पन्नसंयोगेभ्यआत्मानपनसंयोगेभ्यः पवनपरमाणुषुकर्म
णोत्पत्तौसत्यांतेषांपवनपरमाणूनांपरस्परसंयोगेभ्यः द्व्यणुकादि
प्रक्रमेणतेनमहान्वायुः समुत्पन्नोनभसिदोधूयमानोऽदृष्टवशांकंपमा
नः द्रव्यांतरस्यानुत्पत्तेः प्रतिहन्तित्वात् पवनजातिनियमाद्वातिर्यग्
गतस्वभावत्वमस्य तदनंतरंपवनोत्पत्तेरनंतरंतस्मिन्नेवपवनेस्पर्शाद
वेगवत्तयाउत्कटत्वकार्यपतनप्रतिबंधकत्वादाधारभूतेतस्मिन्नापे: आप्येभ्यः

किरणा
५५

55

परमाणुभ्यस्तेनैव द्व्यणुकादिप्रक्रमेण महान्सलिलनिधिरुत्पन्नोऽस्मिंस्प्लवमानस्ति
ष्ठति पवनवेगात् तदनन्तरं सलिलनिधेरुत्पत्त्यनन्तरं तस्मिन्नेव महोदधौ पार्थि
वेभ्यः परमाणुभ्यस्तेनैव द्व्यणुकादिप्रक्रमेण महापृथिवी महती पृथिवी स
मुत्पन्नावतिष्ठते संहतिरवयवसंहत्या निविडावयवावस्थावि शीर्णतया त
दनन्तरं पार्थिवोत्पत्त्यनन्तरं तैजसेभ्यः परमाणुभ्यो महांस्तेजोराशिः अ
नभिभवादनिशायेन दीप्यमानः एवमेतेन क्रमेण महेशाभिध्यानसंकल्पन
मात्रात् व्यतकुलालादिवत्कायव्यापारादित्यर्थः तैजसानां परमाणूनां
पार्थिवपरमाणूनां सहितेभ्यो अण्डमहिरण्मयत्वं विवक्षितं तस्मिन्नण्डे च
त्वारि वदनानि कमलानि यस्य तं सर्वेषां लोकानां पितामहं ब्रह्माणमो
षधलोकान् सकलभुवनसहितं सकलेर घटत्वेन कुलालादिभिकपरित्तेन्[illegible]वा

वली

दिभिर्लोकैः साहित्यमुत्पाद्य प्रजासर्गेविति पुंक्ते त्वमेवं कुर्विति सचोदितं वश
वः समुद्भूये ऽत्यंतं वृद्धिकेऽभिव्यक्तिके प्रकार्ये प्रमहेष्वरस्याधिकर्तृत्वात्
तच महेऽभ्यरेकत्वारिकिं ब्रह्मणोनिवाच्य परेशान्वयव्यतिरेकानुविधा
यिकार्यैस्यात्तस्याप्यातथ्यप्रमाणत्वात् अतिशयेन तस्यातवैराग्येऽप्यपूर्णः सं
पन्नः प्रपन्नः स्यात् समर्पितपितकुर्यान्नयादिविरागी न भवेत् तत्प्रणय
नुरुध्यात् न प्याचप्राणिनां कृतहानिदृष्टाभ्यागमप्रसंगः स्यात् य घनीभवेत् जा
नतोप्युपपादितं तत्सिध्येत् यैश्रि९ तु यसंपन्नः ततः प्राणिनां यानि कर्माणि तस्ला॰७
तेषां विविधपाकं विधित्वा कर्तानीति प्रत्येकमभिसंबध्यते मानसानिति चा
योतिज्ञान् प्रजापतीन् दक्षादीन् स्वस्ववत्स्याप्यध्रुवप्रभृतीन् देवानंत्यादि ऋ
षीन् गोतमभरद्वाजादीन् पितॄन् कव्यवालादीन् गणान् कूष्माण्डादीन् गणेश

शब्दः प्रत्येकं वाभिसंवृध्यते अत्र प्रजापतयः वत्स्याति निपतप्रजा सृष्टादः वली
मतवो राड्डु धर्मप्रवर्त्तयितारः देवाः हविस्रोक्तारः ऋरवयः प्रथमं वेदाध्ये
तारः पितरः स्वधाभागाधिकारिणः गणाः बालिभागिनः सुखेतिसुखा
ह्लादनं वाङुभ्यां राजत्वं उत्कृष्टाविशेषं पश्यांश्च द्रष्टव्यात्यापि तिर्यग्नार
कीप्रवृत्तीनि उद्धाविचानि उत्कृष्टान्यपकृष्टानीति आश्रयानुरूपोसत्ते
फलनानपर्यतमाशेरतऽइत्याशयाः कर्मतानवासनास्तदनुरूपेत्ताद
शोधर्मज्ञानवैराग्यैश्वर्येरित्युपलक्षणं अधर्माज्ञानावैराग्यानैश्वर्यैःस्वत्य
लेष्वकरवादिभिःसम्यग्योजयति यदोहीश्वर एवकार्यविशात्रब्रह्मादिशरी
रमुपादत्त इति पदार्थान्तियोगःकायावाङ्मनोव्यापारासिध्येत् तत्वेर
णां प्रयत्नवदात्मसंयोगलक्षणं सुखेत्यादिना ब्राह्मणत्वदृष्यभिव्यंजक

व्यक्तिविशेषवति मित्रं तत्तदृष्टोपात्तिवन्मत्तभेद प्रतिपादनं तदेव शिष्यत्वाप्र
वं घेनपलपविधि तौम्त्र दष्टापेदो: परार्थ जगत्त्वेन परमेश्वराधिष्ठितो: पृथि
व्यादिभिर्विश्वमारभ्यतरनिवदत्तासर्वेदर्वपलेपा: परिहृतावाङ्गव्याः तथा
हि विछेदेन घचनादातमाय प्रमाण यमभत्दूकछेन मोतसमन्वादिदृष्टा
चाघसलरन्नुपपादयेत् कादृष्टापेलपावैचित्र्यसमर्पयेत् परार्थप्रत्या
चानिः प्रयोजनत्वशंकां उत्सारयेत् परमेश्वराधिष्ठानेन चेतनस्य प्रवृत्ति
चैतन्यप्रवृत्तिनियमो च समंजसपदितिस्यादेतत् सर्वमिदईश्वरसद्भाव
सिद्धौ भवेत् नास्मि तु वेवकिंप्रमाणमितिचेत न तदङ्गत्वेपि किंचिदुच्य
तेवादीस्यतपेत्तात्मतिकबुद्धिमत्पूर्वककारणवत्वात् यत्कारणवत्बुद्धि
मत्पूर्वकं यथा घटः तथा चेतत्तस्मात्तथा ननुक्त्रउपलध्वपूर्वकोदिकेष्व

किरणा
५८

58

वित्तादिषु कारणत्वस्याप्रतीतेर्भागासिद्धमिदमितिचेत् न दृष्टेष्वसावयवली
वत्वेनत्र ज्ञातेषु कार्यगुणत्वेनकर्मसु कर्मत्वेनैव तदनुमानात् कारणाव
त्वस्यासर्वत्रकर्तृपूर्वकत्वेनसहदृष्टान्ते घटादौदर्शनात् नाप्युपलीनास्य
चपदेविवक्षितत्वात् विशेषविरुद्धमिदमिचेत् न साहचर्यमात्रेण
विरोधात् कार्यत्वेनानि– त्वानुमानेरूपसाहचर्यरूपस्य अविनाभा
वाभ्युपगमेत्वसर्वज्ञपूर्वकत्वस्यापपत्ति हेतोकस्ताध– नमभिपेया
न यतोविरुद्धधर्मोपेत असर्वज्ञस्य शरीरियाः प्रमाणनिरस्तत्वात्
त्वमेवतद्विपरीतमभिप्रेषीतिचेत् नत्वेवमसर्वज्ञेन शरीरिणा हेतो
रव्याप्तत्वात् अत एव तद्विपरीतेनाविरोधः न चाविरुद्धस्यानुपलब्धेरि
तिचेत् तत्परं तर्हि विरोधासिद्धेरसंभवो जात्यं धेतत्रूपस्य प्रयोगे विपक्षस्य

चै

रधर्म्मिपरिहारेणप्रतीतेः प्रतीतौकत्वधर्म्मिणिसहोपलंभेनाविरोधस्यबाधि
तत्वात् दर्शनस्पर्शनाभ्यांवायावनुपलंभेपिप्रथिव्यादौरूपसहचरस्पर्शवित्त
स्यादेवतत् नहेतुसाध्ययोर्विरोधाविशेषाविरोधमात्रंचदमहोकिंजातव्याप्ति
पक्षधर्म्मताभ्यामाजीयमानयोर्विशेषयोरेवविरोधः तथाहि ... भुक्ता
वहशक्तिबलप्रव्रजायधावृत्यविशेषमुपस्थापयति नालोकिमस्पर्शाद
त्वोदि पक्षधर्म्मतापि ... किंचित्कृतेनानित्यत्वनादिमत्तातोप
पर्यक्तिइतितद्विपरीतमुपस्थापयति नचानयोर्विरोधोकोचीत्सिअति
सोयंविशेषाविरोधइति तदप्येतान्ति स्वरूपेणतयोरविरोधात्य
रस्परानपेक्षाभ्यांविशेषानुपस्थापनात् माद्ययोरपिपरमवानुसवङ्गि
मातलिति केवलयावाधयाकिंचिदुपतीयतेतत्त्वासतिधर्म्मितावैयर्थ्यात्

क

नाप्ययं धूमवानित्यनयापदाधर्म्मतयानियमानपेक्षयाकिंचिदुपस्थाप्य
ते तथासतिव्याप्तिवैपरीत्यादिति किंतु परस्परसहकारितयातथाचानिरू
पेक्षदशायांविशेषणानुपस्थापनादेवाविरोधः सिद्धिसापेक्षदशायांतुभयाप
स्थितयापरिसमाप्यैकत्वादेवनाविरोधः ननु लौकिकविशेषणोपस्थापकपदा
पदधर्मतानवच्छेदकत्वालौकिकव्याप्त्यादुस्मारितसहकृत इति ब्रूमः किंतासि
द्धेः ईदृति चेत् कोनुतिकाधायिनुपपत्तेः अत्रनैवाविरोधेनान्यापित
सिद्धेरितिचेत् नोदिष्टमापातते घरघट कुर्यात्कार्यत्वकार्यसमभावाद्विकार
त्वात्सहकृत इत्यकारापमापितभविष्यतीति स्यादेतत् साध्याश्रयविशेष
योरेव विरोधांविशेषविरोधसाधुत्वमहे तथाहिनित्यत्वमात्रकाधायादोक्ता
नात्वपरिहारेण्गासिद्धज्ञानत्वंचानित्यत्वपरिहारेणासम्भवादिदिति तथा

कर्त्तुः शरीरित्वं कुविंदादेः अशरीरस्याकर्त्तृत्वं मुक्तस्य तदनयोर्ज्ञानत्वनित्यत्व
योः कर्त्तृत्वाशरीरित्वयो रेकधर्मिसंसर्गो विरुद्ध इति एतदपि नास्ति
उपसंहारस्यानस्यैकधर्मिणोऽप्रतीतेः न हि सप्रतीतत्वे पयःपावकयोर्
वा विरुद्धं किंत्वेकत्र पयसि तेजसि वाप्रसिद्धे वा एकत्रोपसंहीयमाणयो
र्दृष्टे व्याप्तिग्रहस्तानन्त्ये धर्मिभेदेनाविरुद्धत्वेऽपि यथास्मदादिवृद्धप्रागभावे
वोपसंहाराविरुद्ध इति विवादितमप्युपन्यस्ता अशरीरित्वकर्त्तृत्वं वा कुलाला
दौ मुक्तादौ वोपसंहाराविरुद्धं र[illegible]मेतत् चिरजीवितानन्तः किंचिदनि
त्यमप्यपद्यते नाहि नित्यत्वकर्त्तृत्वं नभसि घटादौ वा विरुद्धमिति परमाण्वसा
धनस्य किंचिदपि हीयते अपि च परमाणुनित्यत्वज्ञानेनोपसंहारादनयोर्वि
रोधोभिधानमभिलाषितः सतो हि कृतत्वनित्यत्वयोः परमाणावविवध

र्मिग्राहकेनैव बाधित इति शुध्यस्व । इतिनास्ति विरोधगंधोपि विशेषाविरो
धोदाहरणेन्तु चंदनदहनवानयं धूमात् सुरभि धूमवत्वादिति द्रष्टव्यं स्यादे
तत् व्यापकानुपलब्धिबाध एव विशेषविरोध इत्युच्यते तथाहि
कर्तृत्वव्यापकाः किं शरीरित्वादि यावतो व्यावर्तमानं कर्तारमपि व्यावर्तय
ति न रागादिविकारप्रकाशित्वेन हि मनुष्यवाहिमत्वसाधने ताम्रापकमौष्ण्य
मिव व्याप्तिमत्तमग्नेरिति चेत् नैतदपि साधीयः कस्य हि किमत्र व्या
पकं किं कर्तुः शरीरित्वादिकं आहोस्वित् कार्यस्य शरीरादिमत्कर्तृपूर्वकत्वं प्रथ
मे तु धूमः कर्ताशरीरादिरहितत्वादिति प्रमाणार्थः स्यात् तथाचाश्रयासि
द्धिः धर्मिग्राहकप्रमाणबाधो वा सावयवाः प्रमाणवोप्रेत्यत्वादिति वत्
द्वितीयस्तु नियमः प्रत्यक्षजायमानांकुरादावेव शरीरिणः कर्तुरनुपलंभे

वली
दि

न निरस्तः इत्थं नश्वरत्वे सर्वथैवानुपपत्तेः तस्माद्रसादिविकारो हि यदि रूपादिपरावृ-
त्तिमात्रे हेतुः स्यात् तर्ह्यस्यापि चेत्तेजसा कर्तव्यः नादृष्टो वपाके ऽनिमित्तं
हि मामित्तिन किंचिदनिष्टमापद्यते नहि सौरस्य तेजसः सत्त्वे लोकस्य पाकहेतोर्हि
मादयगमः नामन्तु अपविकारो भस्मादित्तपो विवादितः सो ऽसिद्ध एव हिमह
तेषु रूपादिषु कश्चिद्विरोधो वा बाधो वा अपरूपादिपरावृत्तिमात्रे रोवाग्निः साध्य-
ते तदभावे तस्य दर्शनस्पर्शनयोग्यस्य योग्यानुपलम्भबाधितत्वात् अ-
तादृशस्य तेजोमात्रस्यातिदूरे तिरोभावयत्वात् अनिष्टत्वाच्च तस्मात् भाव
कानुपलब्ध्यानुमानं बाधितम् इतिरिक्तं वचः सत्प्रतिपक्षितं कपर्विस्तत्रा
त अग्निमहिमं सरसादिविकारहेतुत्वात् निरग्निकं हिमं तथा विधौ
स्पर्शहितत्वादिति अस्तु तर्हि दैवप्रकृतेः शरीरानयेद्योत्पत्तिकमकर्त्ते ।१

किरण
६:

60

र्वकं शरीरामपेक्षोऽनित्यत्वात् गगनवदिति नैतदेवं शरीरानपेक्षायाः क्ली
उत्पत्ते साधरसात्वात् सकर्तृकाद्घटादेरिवाकर्तृकादाकाशादेरपि व्यावृत्तेः
त्वात् उत्पत्तिव्यावृत्तिमात्रस्य चासिद्धेः शरीरादनुत्पन्नोऽश्मसामर्थ्यविशेषेण
त्वात् सपक्षेगगनादावनुत्पत्तिमात्रस्यैव व्यापत्वानिश्चयात् विकिन्नव्याप्तेश्च
पक्षोपनयनात् अन्यथातिप्रसंगात् साध्येतत् यथात्मज्ञानस्य नित्यत्वे शरी
रापेक्षास्ति ज्ञानगतकार्यत्वप्रयुक्तत्वाच्छरीरसंबंधस्य न चात्मप्रयत्नस्य नि
त्यत्वे ज्ञानपेक्षापि न स्यात् प्रयत्नगतकार्यत्वप्रयुक्तत्वात् ज्ञानसंबंधस्येति र
तर्कापरि अभ्रिरत्नहृदयस्यामीति चेत् एतदप्यसारं ईश्वरमधिकृत्य तर्केण
मा अप्रयासिद्धसिद्धिभ्यां येनवसरदुस्थत्वात् तथाहि यदीश्वरः कर्त्ता स्यात् श
रीरस्यात् अनित्यज्ञानवांश्च भवेत् यदीश्वरस्य प्रयत्नः स्यात् अनित्यः

स्यात्तत्पदीश्वरप्रयत्नो नित्यः स्यात् ज्ञानानपेक्षः स्यात् यदीश्वरस्य बुद्धिः स्या
त् तत्र सर्वविषयाभवेत् इत्यादयो हि ते नित्यादिकमाधिकृत्य विपर्ययापर्य
वसानाः यदि विवादाध्यासितं बुद्धिमद्धेतुकं भविष्यत् क्वानित्यप्रयत्नहे
तुकमपि स्यात् शरीरजन्यं वाभविष्यत् असर्वज्ञकार्यं वाभविष्यदित्या
दयो हि तेत्तद्विपर्ययाध्यासमर्थविशेषणत्वेन प्रागेव निरस्ताः तत्र प्रयत्ने
न बुद्धिरिह साध्यते उज्ञाप्रयत्नः इतरव्यावृत्त्या अन्यतरव्यावृत्तिर्येनैतत्सिद्धो
पाधिकत्वं चोद्यमावकाशमासादयेत् किंतु धूमवत्त्वेन तृणेन्धनयो[illegible] प्रयत्न=
योर्वदहनवत्त्वमिव कार्यत्वेन परिहृष्टसामर्थ्यकारकचक्रप्रयोक्तृमत्त्वं तत्पा
चसाध्यांप्रा योऽनि प्रयत्नयो र्दहनतार्द्रेन्धनयोरिव सोपाधिरपि संबंधो न
हि तृद्भ्यावित्तस्य साध्यसंबंधेन निरूपाधिकत्वादिति ननु कमरणाविशेषाद

वश्यंकार्यविशेषेणभावितव्यंकस्मिंश्चित्शरीरादिकारणंततोविशेषः स्यात्
अवश्यंचैतदभ्युपगन्तव्यं अन्यथाशरीरिकर्तृकत्वानुमानंनस्यात् सचविशेषो
यद्दृष्टेरक्रियादर्शिनोपिकृतंबुद्धिरुत्पद्यतेतादित्यहरविप्रकर्षेणोच्यते नेतुःसएव
कर्त्तारंप्रयोजयतिकार्यत्वसामान्यंतुतत्रप्रयुक्तोव्याप्तिमुपजीवतीति नविशेषस्य
विशेषंप्रतिप्रयोजकत्वेसामान्यंप्रत्यनुपाधित्वात् अन्यथा[illegible]ष्टत्वादिष्वपि
तरविशेषेष्वप्युपाधिरित्याद्युपलब्धितोविशेषस्तत्प्रयुक्तोव्याप्तिमुपजीवती
ति अप्रयोजकःस्यादितिपक्षेकिंचिदेतत् तद्वस्त्रयदिकार्यकर्त्तारमतिपते
नकारणांतरमप्यतिपतेन्नतथाचकार्यत्वमेवहीयेतेतिसंक्षेपः विस्तरस्तुक
थायकुसुमांजलावात्मतत्त्वविवेकेचाध्यवसेयइति अस्तुतावदेवंविशे
षस्यन्तुकृतःसिद्धिः यथाहप्रतीतेर्विरोधादिप्रत्येतुंनशक्यं तथातस्मा

साधनमप्यप्राकरं लघुस्वरूपं हि कचित्किंचिद्विधीयत इति चेन्न न सामान्यसं
बंधबलेन साध्यसामान्याविधानुपपत्तौ तेन तत्सहकारिपदधर्मताबलेनाप्रती
तौ विशेषपर्यवसानात् सामान्यसंसर्गं निबलप्रवृत्तानां पदानामाकांक्षादि
सहकारिलब्धेरलौकिकद्ववाक्यार्थ इति प्रभाकरमतं अन्यथा तु किंचित्कं
चिदप्रतीतिं प्रतीयते इति चत्रकाश्चिदाहुः केचित्तु केवलव्यतिरेकिणान्व
यजनएवार्थ इव व्यतिरेकार्थेऽपि सिद्धेः तदसत् आकांक्षानुपपत्तिभ्यां वि
शेषोपस्थापनात् प्राक्दोषसर्पोऽयावतावितानान्वयमुपैति तावत्तमर्थ
मनालंब्य प्रतीतेरपर्यवसानमाकांक्षेत्युच्यते तावानवाधे रत्वापि तस्तात्
तीतोऽपर्यवसिताया कचित्प्रमाणान्तरवाध्यानुपपत्तिः तावतीसीमाव्य
तिरेकिणा तदत्र नगादिघारकपर्यन्तपदीकरणोत्तरभादरणपरमार्थवादिवि

किरणा
६२

6[2]

पर्यंत ज्ञानं पदिनस्यात्क: शब्दार्थो न गगसागरादि सकर्तृकमिति परिहृत्य सामवली
पर्य्यकारकचक्र प्रयोक्तः कर्तृ शब्दवाच्यत्वात् एवं स्वर्गादिकार्यपदी करणे
तत्कालेनयादि शरीराद्युत पदं ज्ञानं कोर्थः स्वर्गादिकार्यवुद्धिमत्पूर्वकमिति
सर्गसंनिहितो हि शरीरेंद्रियविषयग्रामविरहो प्रलयादिनः कालः सर्गादिरि
त्युच्यते तस्माद्विशेषाप्रतीत्या सामान्यप्रतीत्यपर्यवसानादिह पदार्
धर्मितासाहाय्यात्कार्यत्वाद्वेवनित्यसर्वज्ञकर्तृसिद्धिः इच्छायदयः केचिद
श्रिताः कार्यत्वाद्गुणत्वाद्वेत्यत्र तत्वद्रव्यातिरिक्तद्रव्यपारतंत्र्यमप्रतीत्य
शब्दार्थो न प्रतीयत इति नास्ति तथाभूयादिशब्दाः दित्याद्युत्तरिकार्याः
दित्यादिविरुद्धापीवापेन तत्प्रातिलेपनीयमेते छादि पदार्थी नामन्वय
प्रमाणांतरवाधपर्यालोचनादनुपपत्तिरित्यन्यदेतादिति अत्राकाशनि

रूपणप्रसंगेन कालदिशोरुपन्यासः आकाशकालदिशामिति पारिभाषिको निमित्तांत
तरेण त्रिस्त्रः संज्ञाः भवंति प्रसंगग्राहिकया आकाशं कालो दिगिति कुतो हेतोरित्यत
आह अपरजात्यभावे सतीति अपरजातीनामाकाशत्वादिजातीनामभावा
दित्यर्थः न देवकृत इत्यत आह एकैकत्वात् व्यक्तिभेदाभावात् नित्यमेकमनेकवृ
त्ति सामान्यमिति लक्षणव्याघातेन स्वरूपव्याघातप्रसंगादिति भावः तथापि
पारिभाषिकत्वमनुपपन्नं अतींद्रियत्वेन स्वरूपानिर्देशादनुपपत्तेः यः शब्दा
श्रयस्तदाकाशमित्येवं शब्दाश्रयत्वमेवोपाधिः स्यात् न शब्दाश्रय
स्योपलक्षणतया तटस्थत्वात् अयमसौ देवदत्त इत्यत्र दंडावत् अन्यथा
शब्दगुणमाकाशमिति सहप्रयोगो न स्यात् यद्येवमाकाशादिशब्देभ्यः
परस्परत्वमलादेः निरर्थकत्वमापद्येतेति चेत् न आकाशस्य स्वरूपमितिव

किरणा
६२
63

दौपचारिकत्वात् व्याकृत्तिपरत्वाद्वेति तस्यस्वरूपास्ति द्वयेद्रव्यत्वव्यवस्थितयेच वली
गुणानाह नवेति तत्रतावत्याकाशकालदिक्षु मध्ये आकाशस्य शब्देतस्य चरू
पसंख्यादिनाच द्रव्यत्वंव्यवस्थाप्यते अरूपितया चक्षुषस्तुत्राप्रवृत्तेः तस्य
चक्षुरयोग्यतामादायैवग्राहकत्वात् अन्यथा आत्मनोपि चाक्षुषत्वप्रसं
गात् कथंतर्हि इहपक्षी नेहपक्षीति प्रत्ययः इति चेत् आलोकमंडलमाश्रि
त्येति ब्रूमः नयापीह लोकोनेहालोक इति कथमिति चेत् तदवयवानाश्रित्ये
तियत्किंचिदेतत् १ कथंभूतः शब्दस्तत्स्वरूपव्यवस्थापक इत्यतआह
शब्दइति तस्पर्शादिविशेषगुणाः प्रत्यक्षत्वेसत्यकारणगुणपूर्वकत्वात्
योपिहि स्पर्शादिविशेषगुणःशब्दाभिधानिसोपिस्थलवीणाशरवाद्या
श्रयाभिधेत् तत्परमाणवाश्रयं अप्रत्यक्षत्वप्रसंगात् परमाणुगुणा

नाप्रतीन्द्रियत्वात् तथा च स्थूलाश्रयस्य सामान्यवतः कार्यत्वेन सामान्या
दिव्यवच्छेदे स्पर्शरहितत्वं तथा च कार्यद्रव्यत्वव्यावृत्तौ प्रतिनियतेन्द्रिय
ग्राह्यत्वं या च सामान्यगुणत्वकर्मत्वव्यावृत्तौ विशेषगुणत्वस्य पक्षवादिसिद्धं
स्पर्शवद्द्रव्यं प्रति शब्दस्यानुमिति येधुः प्रतिज्ञायते न स्पर्शवद्विशेषगु
णा इति अत्र हेतुरकारणपूर्वकत्वादिति स्पर्शवतां शंखादीनां यावन्निस
मवायिकारणानि तेषां ये गुणाः तदनपेक्षत्वात् ये पुनः स्पर्शवद्विशेषगु
णाः न ते तदनपेक्षाः यथा रूपादयः इति केवलव्यतिरेकी अत्र पीठरपा
कोनानुगमानन्तराद्विशेषगुणो विरोधः परमाणुगुणेष्वतस्यात्रानि
रासार्थमाहमप्रत्यक्षत्वं समानीति हेत्वंतरमाहुः यावद्द्रव्यभावित्वादिति सत
स्येवं व शब्दशंखादिषु निवृत्तेः ये पुनस्ते यावद्विशेषगुणाः न ते कुसमन्तेति व

किरण
६९
65

तैत्रेयथारूपादयः अत्रापि पूर्ववत् अन्यदात्वे सत्येत्यनुषंजनीयं अन्यथापर वली
मात्मगुणै रेव विरोधः यस्मात् सुखादीनामात्मविशेषगुणत्वसिद्धावत्वयो
पिद्धव्यः अतपोत्लर्कं सूचयति आश्रयादन्यत्रोपलब्धेरिति आश्रया
भिमतशंखादेरन्यत्र कर्णशष्कुल्यवच्छिन्नेनभस्युपलब्धेः यदिहि शंखाद्या
श्रयः शब्दः स्यात्तर्ह्युपलभ्येत कर्णविवरपिधानतद्वसर्वदैवाप्राप्तेः अप्राप्तश्र
स्यग्रहणे सर्वदैव सर्वत्र सर्वैः सर्वशब्दोपलंभप्रसंगः नचशंखपवनयोः प्रा
प्तिरस्ति नचाश्रयानपेक्षाएवगुणाः परेण प्राप्यंते तस्मात् शंखादीनांतिर
स्कृत्वान्यपहायवीचितरंगन्यायेन दूरान्तरे वर्तमानः कर्णशष्कुलीमंतमा
प्रत्या काशादेशं स्थल उपलभ्यते अन्यथात्वनुपलब्धिप्रसंगः ननुवायुगुणोभ
विष्यतीति अत्यपायीदिसुत्ताडितेऽभ्यावहेगमभिघातिमानः पवनोऽति
भ
ष्टु॰ पं॰ १

मितीभविष्यतीत्यभ्युपगमः वदंतिकेचित् वायुरापद्यतेशब्दतामिति न श्रोत्र
स्यप्रतिनियतार्थग्राहकत्वेनबहिरिंद्रियत्वात् बहिरिंद्रियस्यग्राह्यजातीयवि
शेषगुणवत्वानियमात् अन्यथासर्वस्यसर्वार्थत्वेनांधबाधिराद्यभावप्रसं
गः एकस्यसर्वार्थत्वेनशब्दतोपुरूपांतरानुपलंभप्रसंगात् तथाचशब्द
स्यवायवीयत्वेश्रोत्रस्यापिवायवीयत्वप्रसंगात् ततःकिंमितिचेत् एकस्य
स्पर्शशब्दग्राहकत्वेअनेकार्थतयाबाह्यत्वव्याघातः बाह्यत्वेवाअनेकार्थ
त्वानुपपत्तिः वायवीयत्वाविशेषेपित्वक्श्रोत्रयोर्व्यक्तिभेदात्प्रतिनियता
र्थत्वाविरोधइतिचेत् न प्रतिशरीरंघ्राणादीनांव्यक्तिभेदेपिविषयवैचि
त्र्यादर्शनात् अदृष्टवैचित्र्यात्स्वमपिस्यात्कोविरोधःइतिचेत् तर्हिपार्थि
वेकप्रकृतीनामेवादृष्टवैचित्र्यादुत्पादनवैचित्र्यंविषयव्यवस्थायैभविष्य

किरणा
६५

65

वली

तित्वत्तं त्वगिंद्रियसनादीनां श्रवणत्वं न रकल्पनया बाह्यानुसारेणात्र ननु चेति चेन्न
समः समाधिः तस्मा यथोक्तहेतुभ्यां शब्दो न तस्य बाह्येंद्रियग्राह्यगुणः आत्मगु
णो भविष्यतीत्यत आह नात्मगुण इति कुत इत्यत आह बाह्येंद्रियप्रत्यक्ष
त्वादिति मनसोन्यदिंद्रियं बाह्येंद्रियं तत्प्रत्यक्षत्वात् गंधवदित्यत्वयी बा
ह्येंद्रियत्वं श्रोत्रस्य प्रतीतिपत्तविषयत्वात् चक्षुर्वत् आत्मगुणानां वा
ह्येंद्रियेणाग्रहिलमशक्यत्वात् अन्यथा सुखादीनामपि तत्प्रत्यक्षप्रसंगा
त् हेत्वंतरमाह आत्मांतरग्राह्यत्वादिति यत्र स्वः शब्दः श्रूयते अन्य आत्मा
आत्मांतरं तद्ग्राह्यत्वादित्यर्थः वीणाद्याश्रयो हि शब्दः प्रतीयते न तु स्वात्मा
न त्वाध्यायेन श्रोत्रस्यावात तस्मादन्यश्चास्य ग्राहक इति एतदेव कुतः इति चेत्
ग्राहकात्मन्यसमवायात् ग्राहकासमवायात् इदमप्यस्याः सिद्धमत आह
ये त्वात्मगुणाः ग्रहीते से ग्राहकस्य एव घते पृथक्त्वादयः ग्रहस्त्ते शब्दो न ग्राहकस्या ५ पं० २

अहंकारेण विभक्तानां ग्रहणं चेति अहंकारेण विभक्तस्य ग्रहणात् वीणावाद्य
नेवरण्डः पूर्वपक्षेनात्वहंकाराद्यो एवेति कस्याचिन्मतमयः अहंकारेणव्याधिक
रणस्यात्मसमवायिगंधादीनामपि प्रत्यक्षत्वप्रसंगः अन्येत्यात्मांतरग्राह्यत्वा
दित्यनेकप्रतिपत्तृसाधारणत्वादिति हेत्वर्थं वर्णयंति तन्न संदिग्धासि
द्धेः संतानानुमानेन मूलप्रतिभिज्ञातानेयमदोष इति चेन्न नहि सुखादी
नामप्यनुमानेनानेकप्रतिपत्तृसाधारणप्रत्यभिज्ञानाविषयत्वाल्लौकांतिको
हेतुः स्यात् आत्मसमवेतस्यैव वीचीतरंगन्यायेन मूलप्रतिभिज्ञातापर
पर्याविदितैवाधकाभावाच्च तस्माद्यथाव्याख्यानमेवास्तु ताद्रिकोलमतसं
विशेषगुण इतिशेषः अथहेतुः श्रोत्रग्राह्यत्वादिति अत्रघ्राणेतिव्यर
पकप्यतस्मात्रं ग्राह्यत्वात्प्रत्यक्षत्वादित्येवहेतुः गंधवदिति आत्मगुण

किरणा
६६

66

त्वेनशब्दस्यमनसः श्रोत्रस्यचसांकर्यप्रसंगः दिक्कालमनोगुणत्वेचशब्दस्य
विशेषगुणत्वव्याघातः हेत्वंतरमाह विशेषगुणाभावाच्चेति दिक्कालमनसा
स्तीतिव्याकशेषः प्रयोगस्त्वयं शब्दोनदिक्कालमनोगुणः विशेषगुण
त्वाद्रूपवदिति न रूपत्वेनतेषांवत्वव्याघातः धर्मिग्राहकेण प्रमाणेनते
षांविशेषगुणप्रतिषेधादिति ननुपदितामस्य शब्दः पृथिव्यादीनामष्टा
नांगुणानांभवतिमाभूत आकाशंनवस्मस्तीतिकिं प्रमाणमत आह
परिशेषात् गुणोभूत्वाकाशस्याधिगमे लिंगमिति अयमर्थः शब्दस्ताव
द्रव्याश्रितोगुणत्वात् रूपवदिति सामान्यतो द्रव्यसिद्धौ शब्दाश्रयत्वे
नाकाशसंज्ञायांतिवोषेतायांतदाकाशं पृथिव्यादिभ्योभिद्यते शब्दा
श्रयत्वात् यत्पुनः पृथिव्यादिभ्योनाभिद्यतेनासौ शब्दाश्रयः यथापृथिव्या

वली

द्य एवेत्तच्च नायं शब्दाश्रयः तस्मादितरेभ्यो भिद्यते यथा पृथिव्यादिषु
शब्दो न समवेतीति तथोत्काम धस्त्वादिति निरवद्यं सोयं परिशेषो व्यतिरे
कः तदिदमुक्तं कगुणेभ्यो भूत्वेति एवमाकाशस्य स्वरूपे सिद्धे शब्दगुणत्वेन
गुणांतरेभ्यो व्यावृत्तिः शब्दलिंगा विशेषादिति यद्यपि द्रव्यत्वादेव सामान्यतः
संख्यायां सिद्धायामेकत्वमपि सिद्धं नैकत्वमंतरेणासमवायिकारणं
निरपेक्षां द्वित्वादिका सिद्धाति भवितव्यं च तत्र द्वित्वादिना पृथिव्यादीनां द्वा
नां पंचानां तत्रयाणामित्यादि व्यवहारस्यवाच्यकाविना संख्या निमित्तकत्वा
त् कृत्यपात् पृथिव्यादिष्वपि स्यात्तस्मात् तथापि शब्दाश्रयस्य द्रव्य
स्यानेकत्वव्यवच्छेदेन नित्यतामेकत्वं साधयितुमायमारंभः तत्र द्विवैभवे
सति शब्दलिंगमविशेषात् तत्साधयति सर्वेषामेव शब्दानां तदेकाश्रय

किरणा
६७
67

तयैवोपपत्तौ अत्रार्थान्तरकल्पनायां कल्पनागौरवप्रसंगात् अत्रोत्रमवर वली
स्याप्यहेतुत्वावस्य यैवोपपद्यत इति वक्ष्यमाणत्वादिति तदनुविधाना
त्मपत्वं एतदपि एर्वतः द्रव्यत्वेन सामान्यतः परिमाणसिद्धौ सत्यामाह
विभववचनादिति विभुत्वान्महतोनुक्तस्य त्याग्मे त्रिस्त्वेकार वचनात्
विभवो विभुत्वं सर्वैर्मूर्तैर्भिः संयोगः नस्मान्यपरममहत्परिमाण
म परिमितस्य सर्वयोगानुपपत्तेः परममहदिति भावः प्रथमतो निर्देशः अत्र
यद्यपरममहत्तो द्रव्यस्य परिमाणं परिमाणमिति वक्तीत्युक्त्वा साम्ना परममहत्
नाधिकरणस्य हि परममहत्परिमाणमिति स्यात् अत्र विभुत्वस्यकृतः
सिद्धिः स्पर्शशून्यत्वे सति प्रत्यक्षगुणाश्रयत्वादात्मवत् अन्यथाप
रमाणुत्वे प्रत्यक्षगुणाश्रयत्वाविरोधात् अवयवित्वे स्पर्शवत्त्वावि

सोऽधस्तात् शब्दकारणवचनात्संयोगविभागौ संयोगविभागौ तु शब्दाच्च
शब्दनिष्पत्तिरिति सूत्रकारवचनात् यद्यपि द्रव्यत्वेनैव संयोगविभागयोः
सिद्धिः तथापि विपक्षे बाधकं कत्तृव्याप्तिमिति उच्यते यदि संयोगविभागौ
मभासि न स्यातां तत्र समवायिकारणाभावे शब्दो नोत्पद्येतेति यद्यपि ध
र्मिग्राहकप्रमाणादेव द्रव्यत्वमस्यासिद्धं तथापि संख्यादिमत्ता गुणोत्तापि
तत्त्वाद्यपि तु शब्दस्येति तदप्याह अनश्रुति गुणवत्त्वोऽप्यद्रव्यत्वे स्पर्श
वत्तत्त्वव्याघातादिति अन्ताधिनत्वाद्रीति आश्रयैकस्वभावत्वादु
त्पत्तेः अन्यथा समवायेन व्यभिचारः आश्रयैकस्वभावस्याप्यद्रव्यत्वे
